दि॰ 27-8-20 उपशास्त्री द्वितीयवर्ष, विषय-व्याकरण

ग्रन्थ-सिद्धान्तकौमुदी (भ्वादिप्रकरणम्)

1 अयुः - या धातोर्लङ् लङ्स्थाने तिप्तस्झि इति सूत्रेण झि प्रत्यये। झोऽन्तः इति अन्तादेशे, इतश्च इति इकार लोपे। तिङ्शित्सार्वधातुकम् इति सार्वधातुक संज्ञायाम्, कर्तरि शप् इति शप् प्रत्यये; अदिप्रभृतिभ्यः शपः इति शपो लुकि, लङः शाकटायनस्यैव इति सूत्रेण झेर्जुसादेशे, अनुबन्धलोपे लुङ्लङ्लृङ्क्ष्वडुदात्तः इति अडागमे। उस्यपदान्तात् इति पररूपे सत्व रुत्व विसर्गे अयुः इति सिद्धम्।

2 वेद - विद् ज्ञाने धातोर्लट् लट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये। सार्वधातुक संज्ञायां, शप् प्रत्यये अदिप्रभृतिभ्यः शपः इति शपो लुकि। विद ति इति जाते विदो लटो वा इति सूत्रेण तिप्स्थाने विकल्पेन णलादेशे अनुबन्धलोपे। सार्वधातुकार्धधातुकयोः इति सूत्रेण गुणे वेद इति सिद्धम्।

3 विदतुः - विद् धातोर्लट्, लट्स्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्धलोपे, सार्वधातुक संज्ञायां शप् प्रत्यये। अदिप्रभृतिभ्यः शपः इति शपो लुकि विदो लटो वा इति सूत्रेण तस्स्थाने अतुसादेशे। सार्वधातुकत्वात् गुणे प्राप्ते सार्वधातुकमपित् इति सूत्रेण ङित्वे ङित्वात् गुणनिषेधे सत्व रुत्व विसर्गे विदतुः इति सिद्धम्।

4 विदाञ्चकार - विद् धातोर्लिट् लिट्स्थाने तिप्तस्झि इति सूत्रेण तिप्, परस्मैपदानां णल --- इति सूत्रेण णलादेशे अनुबन्धलोपे। उषविदजागृभ्योऽन्यतरस्याम् इति सूत्रेण आम् प्रत्यये। कृञ्चानुप्रयुज्यते लिटि इति आम्परकस्य धातोरनुप्रयोगे। लिटि धातोरनभ्यासस्य इति द्वित्वे अभ्यासादिकार्ये विद् आम् च कृ अ इति दशायाम्। अत उपधायाः इति वृद्धौ रपरे विदाञ्चकार इति सिद्धम्।

अमरनाथ मिश्र
एसो॰ प्रो॰ व्याकरण
रा॰ उ॰ सं॰ म॰ वि॰
सुरखसेना पूर्णिया

शास्त्री प्रथम खण्ड, विषय व्याकरण

दिनांक 27-8-20 ग्रन्थ - सिद्धान्त कौमुदी (समास प्रकरणम्)

1 द्वादश — द्वाधिकादश इत्यर्थे सिद्धं तु अधिकान्ता संख्या संख्यया समानाधिकरणे अधिक लोपश्च इति वार्तिकेन समासे तथा अधिक पदस्य लोपे। द्व्यष्टनः संख्यायाम् अबहुव्रीह्यशीत्योः इति सूत्रेण द्वि इत्यस्य आत्वे द्वादश इति सिद्धम्।

2 अष्टाविंशति — अष्टाधिकाविंशतिश्च इत्यर्थे सिद्धं तु अधिकान्ता संख्या संख्यया समानाधिकरणाधिकारे अधिक लोपश्च इति वार्तिकेन समासे, तथा अधिक पदस्य लोपः। द्व्यष्टनः संख्यायाम् अबहुव्रीह्यशीत्योः इति सूत्रेण आत्वे कृते विभक्तिकार्ये। अष्टादश इति सिद्धम्।

3 ~~मयूरी~~ कुक्कुटाः मयूरीकुक्कुटौ — मयूरी च कुक्कुटश्च इति विग्रहे चार्थे द्वन्द्वः इति सूत्रेण समासे कृते। समासत्वात् प्रातिपदिकसंज्ञायां परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः इति सूत्रेण इति सूत्रेण मयूरी वा लिङ्गम्। मयूरीकुक्कुटौ इति सिद्धम्।

3 अर्धपिप्पली — अर्धं पिप्पल्याः इति विग्रहे अर्धं नपुंसकम् इति सूत्रेण समासे कृते। समासत्वात् प्रातिपदिकसंज्ञायाम् सुब्लुक्। परवत् लिङ्गं द्वन्द्वतत्पुरुषयोः इति सूत्र परवत्लिङ्ग ग्रहणम्, अर्धपिप्पली इति सिद्धम्।

4 प्राप्तजीविकः — प्राप्तो जीविकाम् इति विग्रहे प्राप्तापन्ने च द्वितीयया इति सूत्रेण समासे कृते। एकविभक्ति च पूर्वनिपाते इति सूत्रेण उपसर्जनसंज्ञायाम्, गोस्त्रियोरुपसर्जनस्य इति ह्रस्वे कृते। परवत्लिङ्गं द्वन्द्वतत्पुरुषयोः इति परवल्लिङ्गम्। पञ्चकपालः इति सिद्धम्।


अमरनाथ मिश्र
ए० प्रो०
व्याकरण
रा० उ० सं० म० वि०
सुखसेना पूर्णिया

दिनांक
२१-८-२०

शास्त्री प्रथम खण्ड, विषय दर्शन (अनि० प्र० पत्रम्)

ग्रन्थ- तर्क संग्रह

प्रश्न प्रयत्नस्य किं लक्षणम्

उत्तर प्रयत्नत्व जाति मत्वे सति गुणत्वं प्रयत्नस्य लक्षणम्।

प्रश्न धर्मस्य किं लक्षणम् —

वेदबोधित कर्मजन्यत्वे सति गुणत्वं धर्मत्वम्।

प्रश्न अधर्मस्य किं लक्षणम्.

उत्तर श्रुति स्मृति कर्म जन्यत्वे सति गुणत्वं अधर्मत्वम्।

प्रश्न आत्ममात्र विशेष गुणाः के

उत्तर बुद्धि सुख दुःख इच्छा द्वेष प्रयत्न धर्म अधर्मा अष्टात्मन विशेषगुणाः। तत्र बुद्धी इच्छा प्रयत्नाः द्विविधाः नित्या अनित्याश्च। नित्याः ईश्वरस्य, अनित्याः जीवस्य।

प्रश्न भावनायाः किं लक्षणम्. उ साच कुत्र वर्तते।

उत्तर अनुभवजन्यत्वे सति स्मृति हेतुत्वं भावनाया लक्षणम्। आत्मनः संयोगोऽति व्याप्ति वारणाय सत्यन्तम्। अनुभव ध्वंसेऽति व्याप्ति वारणाय विशेष्य दलम्। साच भावना आत्म वृत्तिः।

प्रश्न स्थितिस्थापकस्य किं लक्षणम्? स कुत्र तिष्ठति।

उत्तर- अन्यथा कृतस्य पुनस्तदवस्थापकः संस्कारः स्थितिस्थापकः। एवञ्च प्रकृतावस्थाभिन्नावस्थापादक व्यापारानुकूल कृति विषयवस्तु निष्ठ प्रकृतावस्थापादकत्वं स्थितिस्थापकत्वमिति पर्यवसन्नम्। सच सच कटादि रूप पृथ्वी-मात्र वृत्तिः।

प्रश्न संस्कारस्य किं लक्षणम् —

उत्तर सामान्य गुणात्म विशेषगुणोभय वृत्ति गुणत्व व्याप्य जाति मत्वम् संस्कारत्वम्।

अमरनाथ मिश्र
स० प्रा० व्याकरण
रा० उ० सं० म० वि०
सुलतानपुर